# संस्कृतबालादर्शे सप्तमः पाठः । ७

धेनुः । व्याघ्रः ।

| | | |
|---|---|---|
| क्षीरम् । | ज्ञानम् । | आहारः । |
| वत्सः | धनम् । | उद्यानम् । |
| अध्ययनम् । | विद्या । | पाठालयः । |

वयम् । यूयम् ।

धेनवः वत्सेभ्यः क्षीरं वितरन्ति । व्याघ्रः आहाराय भ्राम्यति । बालकाः अध्ययनाय पाठालयं गच्छन्ति । बालिकाः पुष्प्याय उद्यानं व्रजन्ति । वयं जलाय नदीं गच्छामः । यूयं अश्वेभ्यः तृणं यच्छथ । वयं ज्ञानाय पठामः । जनाः धनाय देशान्तरं गच्छन्ति । बालाः विद्यायै धनं यच्छन्ति ।

**क) प्रश्नाः ।**

१ । धेनवः केभ्यः क्षीरं वितरन्ति ? धेनवः वत्सेभ्यः क्षीरं वितरन्ति ।

२ । व्याघ्रः किमर्थं परि भ्राम्यति।? व्याघ्रः आहाराय परि भ्राम्यति ।

३ । बालकाः किमर्थं पाठालयं गच्छन्ति ? बालकाः अध्ययनाय पाठालयं गच्छन्ति ।

४ । बालिकाः किमर्थं उद्यानं व्रजन्ति? बालिकाः पुष्पाय उद्यानं व्रजन्ति ।

५ । यूयं कमर्थं नदीं गच्छन्ति? वयं जलाय नदीं गच्छामः ।

६ । वयं केभ्यः तृणं यच्छामः? यूयं अश्वेभ्यः तृणं यच्छथ ।

७। यूयं किमर्थं पठथ ? वयं ज्ञानाय (ज्ञानार्थं) पठामः।

८। जनाः किमर्थं कुत्र गच्छन्ति? जनाः धनाय देशान्तरं गच्छन्ति।

९। विद्यायै के किं यच्छन्ति ? बालाः विद्यायै धनं यच्छन्ति।

**ख)** चतुर्थ्यन्तैः पदैः वाक्यानि पूरयत।

अहं (धेनु) तृणं यच्छमि। अहं **धेनवे , धेन्वै** तृणं यच्छमि।

नृपाः (कवि) धनं यच्छन्ति। नृपाः **कवये** धनं यच्छन्ति।

यूयं (ज्ञान) ग्रंथान् पठथ। यूयं **ज्ञानाय** ग्रंथान् पठथ।

**ग)** लट् रूपैः वाक्यानि पूरयत।

छात्राः सायम् आरोग्याय (क्रीड्)। छात्राः सायम् आरोग्याय **क्रीडन्ति**।

बालौ हस्ताभ्यां पुस्तकानि (आनय्)। बालौ हस्ताभ्यां पुस्तकानि **आनयतः**।

वयं नेत्राभ्यां वस्तूनि (पश्य्)। वयं नेत्राभ्यां वस्तूनि **पश्यामः**।

**शब्दसंग्रहः = Vocabulary**

धेनुः = *f* cow, वत्सः = *m* calf, क्षीरम् = *n* milk, व्याघ्रः = *m* tiger, आहारः = *m* food, ज्ञानम् = *n* knowledge, उद्यानम् = *n* garden, अध्ययनं = *n* study, पाठालयः = *m* school, वयम् = *pl.* we, यूयम् = *pl.* you, वितरन्ति = *P.* they give, भ्राम्यति = *P.* wanders, व्रजन्ति = *P.* thry go, यच्छथ = *P.* you (*pl.*) give, देशान्तरम् = *n* another country, नृपः = *m* king, कविः = *m* poet